यद्यपि धर्म शब्द को वेदार्थ का उपलक्षण माना जाता है तो धर्म-विचार की तरह वेदार्थ-विचार से ब्रह्म-विचार का आक्षेप हो सकता है। इस शंका का समाधान तथापि इत्यादि में भामतीकार ने किया है तथापि पूर्व-मीमांसा में ब्रह्म-विचार का व्युत्पादन नहीं है अतः भगवान् बादरायण ने पृथक् सूत्र किया। वस्तुतः ब्रह्मविचार की प्रतीज्ञा वहाँ संभव नहीं, क्योंकि वेदाध्ययन करने पर भी ब्रह्म-विचार में रागी की प्रवृत्ति नहीं होती अतः केवल वेदाध्ययन मात्रका आनन्तर्यं ब्रह्मविचार में सम्भव नहीं है, इसलिए अर्थात् ब्रह्मविचार के प्रारम्भ के लिए और नित्यानित्य वस्तुविवेकादि साधन चतुष्टय सम्पत्ति, के अनन्तर ही ब्रह्मजिज्ञासा होती है, उसके बाद ही ब्रह्मका विचार श्रेयस्कर है।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri


यह जनाने के लिए यह सूत्र अथातो ब्रह्मजिज्ञासा प्रारम्भ किया गया जिससे कि धर्मजिज्ञासा सूत्र से पौनरुक्त्य नहीं है ।

## शाङ्कर भाष्यम्

तत्पुनर्ब्रह्म प्रसिद्धमप्रसिद्धं वा स्यात् । यदि प्रसिद्धं न जिज्ञासितव्यम् । अथाप्रसिद्धं नैव शक्यं जिज्ञासितुमिति । उच्यते—अस्ति तावद् ब्रह्म नित्य शुद्ध बुद्ध मुक्तस्वभावं सर्वज्ञं सर्वशक्ति समन्वितम् । ब्रह्म शब्दस्य हि व्युत्पाद्यमानस्य नित्य शुद्धत्वादयोऽर्थाः प्रतीयन्ते, बृहतेर्धातोरर्थानुगमात् । सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः । सर्वो ह्यात्मास्तित्वं प्रत्येति न नाहमस्मीति । यदि हि नात्मास्तित्वप्रसिद्धिः स्यात्, सर्वो लोको नाहमस्मीति प्रतीयात् । आत्मा च ब्रह्म । यदि तर्हि लोके ब्रह्मात्मत्वेन प्रसिद्धमस्ति ततो ज्ञातमेवेत्यजिज्ञास्यत्वं पुनरापन्नं न, तद्विशेषं प्रति विप्रतिपत्तेः ।

## भामती

स्यादेतत्, एतेन सूत्रेण ब्रह्मज्ञानं प्रत्युपायता मीमांसायाः प्रतिपाद्यत इत्युक्तं, तदयुक्तं, विकल्पासहत्वादिति चोदयति—तत्पुनर्ब्रह्मेति । वेदान्तेभ्योऽपौरुषेयतया स्वतःसिद्ध प्रामाण्येभ्यः प्रसिद्धमप्रसिद्धं वा स्यात् । यदि प्रसिद्धं वेदान्तवाक्यसमुत्थेन निश्चयज्ञानेन विषयीकृतं ततो न जिज्ञासितव्यम्, निष्पादित क्रिये कर्मणि अविशेषाधायिनः साधनस्य साधनन्यायातिपातात् । अथाप्रसिद्धं वेदान्तेभ्यः, तर्हि न तद्वेदान्ताः प्रतिपादयन्तीति सर्वथाऽप्रसिद्धं नैव शक्यं जिज्ञासितु । अनुभूते हि प्रिये भवतीच्छा न तु सर्वथाऽननुभूतपूर्वे । न चेष्यमाणमपि शक्यं ज्ञातुं, प्रमाणाभावात् । शब्दो हि तस्य प्रमाणम् वक्तव्यम् यथा वक्ष्यति " शास्त्रयोनित्वादि " ति । स चेत्तन्नावबोधयति, कुतस्तस्य तत्र प्रामाण्यम् । न च प्रमाणान्तरं ब्रह्मणि प्रक्रमते । तस्मात्प्रसिद्धस्य ज्ञातुं शक्यस्याप्यजिज्ञासनाद् अप्रसिद्धस्येच्छायाः अविषयत्वात्, अशक्यज्ञानत्वाच्च न ब्रह्म जिज्ञास्यमित्याक्षेपः । परिहरति—उच्यते अस्ति तावद् ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावम् । अयमर्थः प्रागपि ब्रह्ममीमांसाया अधीतवेदस्य निगमनिरुक्त व्याकरणादि परिशीलन विदितपदतदर्थ सम्बन्धस्य सदेव सोम्येदमग्र आसीदि त्युक्रमात् तत्त्वमसीत्यन्तात् ' सन्दर्भान्नित्यत्वाद्युपेत ब्रह्मस्वरूपावगमस्तावदापाततो विचाराद्विनाऽप्यस्ति । अत्र च ब्रह्मेत्यादिनावगम्येन तद्विषयमवगमं लक्षयति, तदस्तित्वस्य सति विमर्शे विचारात्प्रागनिर्णयात् । नित्येति क्षयिता लक्षण दुःखमुपक्षिपति । शुद्धेति देहाद्युपाधिकमपि दुःखमपाकरोति । बुद्धेत्यपराधीन प्रकाशमानन्दात्मानं दर्शयति, आनन्दप्रकाशयोरभेदात्

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्यादेतत्, मुक्तौ सत्यामस्यैते शुद्धत्वादयः प्रथन्ते, ततस्तु प्रागदेहाद्यभेदेन तद्धर्मजन्मजरामरणादि दुःखयोगादित्यत उक्तम् मुक्तेति। सदैव मुक्तः सदैव केवलोऽनाद्यविद्यावशात्तु भ्रान्त्या तथाऽवभासत इत्यर्थः। तदेवमनौपाधिकं ब्रह्मणोरूपम् दर्शयित्वाऽविद्योपाधिकम् रूपमाह सर्वज्ञः सर्वशक्तिसमन्वितम्। तदनेन जगत्कारणत्वमस्य दर्शितं, शक्तिज्ञानभावाभावानुविधानात् कारणत्वभावाभावयोः। कुतः पुनरेवम्भूतब्रह्मस्वरूपावगतिरित्यत आह—ब्रह्मशब्दस्य हीति। न केवलं 'सदेव सोम्येदं' इत्यादीनां वाक्यानां पौर्वापर्यालोचनया इत्थम्भूत ब्रह्मावगतिः, अपि तु ब्रह्मपदमपि निर्वचन सामर्थ्यादिममेवार्थं स्वहस्तयति। निर्वचनमाह—बृहते र्धातोरर्थानुगमात्। वृद्धिकर्मा हि बृहतिरतिशायने वर्तते। तच्चेदमतिशायनमनवच्छिन्नं पदान्तरावगमितं नित्यशुद्ध बुद्धत्वाद्यस्याभ्यनुजानातीत्यर्थः। तदेवं तत्पदार्थस्य शुद्धत्वादेः प्रसिद्धिमभिधाय त्वं पदार्थस्याप्याह—सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः। सर्वस्य पांशुलपादकस्य हालिकस्यापि ब्रह्मास्तित्वप्रसिद्धिः। कुतः आत्मत्वात्। एतदेव स्फुटयति सर्वो हीति प्रतीतिमेवाप्रतीति निराकरणेन द्रढयति न नेति। न न प्रत्येत्यहमस्मीति, किन्तु प्रत्येत्येवेति योजना। नन्वहमस्मीति च ज्ञास्यति मा च ज्ञासीदात्मानमित्यत आह यदीति। अहमस्मीति न प्रतीयात्। अहंकारास्पदं हि जीवात्मानं चेन्न प्रतीयादहमिति न प्रतियादित्यर्थः। ननु प्रत्येतु सर्वोजनः आत्मानमहंकारास्पदं ब्रह्मणि तु किमायातमित्यत आह आत्मा च ब्रह्म। तदस्त्वमसा सामानाधिकरण्यात्, तस्मात्तत्पदार्थस्य शुद्धबुद्धत्वादेः शब्दतः त्वं पदार्थस्य च जीवात्मनः प्रत्यक्षतः प्रसिद्धेः पदार्थज्ञान पूर्वकत्वाच्च वाक्यार्थज्ञानस्य त्वं पदार्थस्य ब्रह्मभावागमस्तत्त्वमसीति वाक्याद् उपपद्यत इति भावः। आक्षेप्ता प्रथम कल्पाश्रयं दोषमाह, यदि तर्हि लोक इति। अध्यापकाध्येतृपरम्परा लोकः। तत्र तत्त्वमसीतिवाक्याद् यदि ब्रह्मात्मत्वेन प्रसिद्धमस्ति, आत्मा ब्रह्मत्वेनेति वक्तव्ये ब्रह्मात्मत्वेनेत्य भेद विवक्षया गमयितव्यम्। परिहरति 'न; कुतः तद्विशेषं प्रति विप्रतिपत्तेः। तदनेन विप्रतिपत्ति साधकबाधक प्रमाणाभावे सति संशयबीजमुक्तम् ततश्च संशयाजिज्ञासोपपद्यत इति भावः।

सुभद्रा—इस सूत्र से "ब्रह्मज्ञान के प्रति विचार उपाय है" यह जो कहा गया है, वह विकल्प के न होने के कारण ठीक नहीं। तत्पुनर्ब्रह्म—अपौरुषेय होनेसे स्वतः प्रामाण्य है जिसमें, ऐसे वेदान्त वाक्यों से ब्रह्म प्रसिद्ध है या अप्रसिद्ध? यदि ब्रह्म प्रसिद्ध है अर्थात् वेदान्त वाक्यजन्य निश्चयात्मक ज्ञान का विषय है तो फिर

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri


वह जिज्ञासा का विषय कैसे ? क्योंकि ऐसे कर्म ( विषय ) में, जिसमें प्रमिति ( निश्चयात्मक ज्ञानरूपा क्रिया ) सिद्ध है, किसी विशेषता को उत्पन्न न करने वाले साधन न्याय का प्रतिपाद होने लगेगा । भाव यह है कि कार्यसिद्धि के लिए साधन की क्या आवश्यकता ? जो उसमें कुछ विशेषता न उत्पन्न करे । अतः वह साधन हो नहीं । यह साधन.न्याय का प्रतिपाद है । प्रकृत में यदि वेदान्त वाक्या से पूर्व ही ब्रह्म सिद्ध है तो साधनभूत मीमांसा की क्या आवश्यकता यदि ब्रह्म वेदान्त वाक्यों से अप्रसिद्ध है तो वेदान्त उसके प्रतिपादन मे असमर्थ है तो सर्वथा अप्रसिद्ध भी जिज्ञासा का विषय नहीं हो सकता ।

प्रिय वस्तु का अनुभव रहन पर ही उसकी इच्छा होती है । पूर्व में जिसका अनुभव नहीं है उसकी इच्छा भी नहीं होती इच्छा का विषय होन पर भी प्रमाण न होने से उसका जानना असम्भव है । ब्रह्म में शब्द ही प्रमाण है यह कहना होगा, जैसा कि कहेंगे 'शास्त्रयोनित्वात्'—वह शास्त्र यदि उसका अवबोध कराने में समर्थ नहीं है तो उसमें प्रामाण्य कैसे ? अन्य कोई प्रमाण ब्रह्म में प्रक्रान्त नहीं है । इस लिए 'प्रसिद्ध' जानने के योग्य होने पर भी प्रसिद्ध होने से जिज्ञासा का विषय नही है । इच्छा का विषय न होने से अप्रसिद्ध का ज्ञान ही नहीं हो सकता तो ब्रह्म जिज्ञासा का विषय नहीं हो सकता यह अभिप्राय है । ऐसी शंका होती है । इसका समाधान भाष्य ये 'अस्तितावद् ब्रह्म' इत्यादि से किया है— ब्रह्म नित्य शुद्ध बुद्ध मुक्त स्वभाव सर्वज्ञ तथा सर्व शक्तिमान है । भाव यह है कि सर्वदा एक रूप से अवस्थित रहने वाले ब्रह्म में विचार से पहिले ही 'सत्य ज्ञान-मनन्तं ब्रह्म'' इत्यादि अपौरुषेय वेदान्त वाक्यों से ज्ञान होता है परन्तु वह ज्ञान पुरुषगत दोषवश उत्पन्न होने पर भी उसके संशयाक्रान्त होने से अप्रामाण्यज्ञाना नास्कन्दित होकर स्थिति को लाभ करने में समर्थ नहीं है ।

इसलिए ब्रह्म ज्ञात नहीं है यह नहीं कहा जा सकता । अतः ''अस्ति तावत्-ब्रह्म'' इत्यादि से ब्रह्म की अप्रसिद्धि का सर्वथा परिहार हो जाता है, इसका वर्णन कर रहे हैं । अयमर्थः—जिसने निगम वेद उसके श्रोत्रस्थानीय निरुक्त एवं मुखस्थानीय व्याकरणादि अङ्गों का चिन्तन करने से पद, अर्थ और सम्बन्ध आदि को जान लिया है उसको 'सदेव सोम्येदमग्र आसीत्' आदि उपक्रम 'प्रारम्भ' 'तत्त्वमसि' आदि उपसंहार 'समाप्ति' तत्पर्यन्त सन्दर्भ से नित्य-शुद्धत्वादि धर्मों से युक्त ब्रह्मस्वरूप का ज्ञान आपाततः अर्थात् विचार के बिना भी होता है ।

शंका—किसी अंश, किसी धर्म से ज्ञात, अन्य अंश से अन्य धर्म से अज्ञात वस्तु में जिज्ञासा होती है । अद्वैत सिद्धान्त में अंश रहित निर्धर्मक निर्विशेष ब्रह्म में

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जिज्ञासा नहीं हो सकती तो तन्मूलक विचार भी असम्भव है इसलिए निर्गुण-ब्रह्म का विचार सूत्र से विवक्षित नहीं है किन्तु सगुण-ब्रह्म ही विचार का विषय है।

समाधान—जिसमें संशयात्मक ज्ञान होता है उसके निर्णय के लिए जिज्ञासा होती है यह सर्वानुभव सिद्ध है। संशयत्व कोई जाति नहीं है, किन्तु "मैं सन्देह करता हूँ" इस प्रकार का अनुभव सिद्ध ज्ञान में रहने वाला विषयिता[1] विशेषरूप है। वह जैसे विरुद्ध कोटिद्वयावगाहि 'स्थाणुर्वा' 'पुरुषो वा' में रहता है उसी तरह विचार के बिना जायमान ज्ञान में भी आपाततः विद्यमान है। इस प्रकार "साक्षी चेता केवलो निर्गुणश्च यम्मामतं तस्यमतम् अविज्ञातं विजानताम्" विज्ञातारमरे केन विजानीयात् इत्यादि निर्विशेष ब्रह्म प्रतिपादक वाक्यों से उत्पन्न ज्ञान जिसको है उसी को संशय होगा तो उसके निर्णय के लिए निर्गुण ब्रह्म विषयक विचार भी आवश्यक है अर्थात् जिस पुरुष को दोषवशात् उक्तवाक्यजन्यज्ञान में प्रामाण्य निश्चय नहीं है उसके लिए विचार की आवश्यकता है और जिस पुरुष श्रेष्ठ को उक्तवाक्य को सुनने के बाद यथार्थ ज्ञान, हो गया उसके लिए विचार की आवश्यकता नहीं है। यद्यपि वेद निर्दोष है तथापि वह बुद्धि दोषवश सामान्यतः कहीं पर देखे हुए वचनाभास के समान समझ लेने पर सदिग्धार्थक हो सकता है। यद्यपि विचार से पूर्व भी उपनिषद् वाक्यों से ब्रह्म की प्रसिद्धि है परन्तु निश्चित ज्ञान नहीं है अतः निर्णय के लिए विचार अपेक्षित हैं।

विचार के पूर्व निर्णय न होने से अस्तित्व में संशय होने पर जानने के योग्य ब्रह्मशब्द से तद्विषयक ज्ञान लक्षित होता है ब्रह्म शब्द की व्युत्पत्ति वृह् धातु से होती है, जिसका अर्थ निरतिशय महत्व है। इससे नित्य-शुद्धत्वादि अर्थ प्रतीत होते हैं नित्य कहने से विनाश रूप दुःख का निराकरण, शुद्ध कहने से शरीराद्युपाधिक दुःख की निवृत्ति, बुद्ध से अन्य के द्वारा प्रकाशित न होने वाले अर्थ प्रकट होते हैं। ऐसे आनन्द रूप आत्मा का बोध आनन्द और प्रकाश में अभेद होने से होता है। जीव और ब्रह्म में मुक्तावस्था में अभेद और उसके पूर्व भेद मानने वालों के मत से यह शंका की गई। अच्छा तो मुक्त होने पर भले ही आत्मा में शुद्धत्वादि धर्म प्रसिद्ध हो परन्तु उसके पूर्व शरीरेन्द्रिय आदि के साथ अभेद होने से

१—जिस वस्तु का ज्ञान होता है। वह विषय होता है, ज्ञान विषयी होता है विषय में विषयता रहती है, ज्ञानरूप विषयी में विषयिता रहती है, संशय भी ज्ञान विशेष है इसके उस में विषयिता विशेष रहता है।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri


उनमें रहने वाले धर्म जन्म जरामृत्यु आदि दुःख का सम्बन्ध आत्मा में संभव हो सकता है. इस लिए मुक्त कहा गया। सर्वदा मुक्त सर्वदा केवल शुद्धरूप भी आत्मा अनादि अविद्यावश भ्रान्ति से बद्ध और अशुद्ध की तरह भासता है। इस प्रकार ब्रह्म का उपाधि रहित रूप दिखलाकर अविद्योपाधिकरूप बता रहे हैं।

ईश्वर सर्वज्ञ, सर्व शक्तिसमन्वित और मायावच्छिन्न है अर्थात् सगुण ब्रह्म ईश्वर को उपाधिभूत अविद्या ही 'माया' पद से व्यवहृत होती है जो कि शुद्ध सत्वगुण प्रधान है। जीव के उपाधिभूत तत्तादन्तः करण हैं उन उपाधियों से विशिष्ट जीव में रहने वाली मलिनता सत्वप्रधान अविद्या से भिन्न है जिससे कि जोव में हो अज्ञता का व्यवहार होता है न कि ईश्वर में उक्त जीव में रहने वाली अविद्याओं से ईश्वर विषय किया जाता है न कि शुद्ध ब्रह्म। एक ही ईश्वर सम्पूर्ण जीव में रहने वाले अज्ञान का विषय है अतः जीव-भेद से ईश्वर में भेद नहीं है। इससे जगत का कारण ईश्वर है, यह प्रदर्शित हुआ। क्योंकि ज्ञान और शक्ति जिसमें रहती है वही कर्त्तारूप कारण होता है, अन्य नहीं। तो शक्ति और ज्ञान के रहने पर कारणता, उसके अभाव में कारणत्वरूप कर्तृत्वाभाव होने से सर्वज्ञ, सर्व शक्तिमान ईश्वर जगत का करण होता है। उक्त ब्रह्म स्वरूप का ज्ञान कैसे होता है इस पर कह रहे हैं। ब्रह्मशब्दस्य हि—नित्य शुद्ध ब्रह्म की प्रतीति केवल 'सदेव सोम्येदम्' 'तत्त्वमसि' इत्यादि वाक्य सन्दर्भ के पूर्वापर को आलोचना से ही नहीं होती किन्तु ब्रह्म शब्द भी अपने निर्वचन के सामर्थ्य से इसी अर्थ को प्रकट करता है। भाष्य में निर्वचन कर रहे हैं—बृहतेर्धातोरर्थानुगमात् बृह धातु का अर्थ वृद्धि है, वृद्धि रूप क्रिया जिस बृह धातु का है वह अतिशय अर्थ में वर्तमान है जो, अतिशय विशिष्ट ब्रह्म है तो घट-वृक्षादि को भाँति आपेक्षिक महत्व ब्रह्म में होगा नहीं क्योंकि वह तो अतिशय से अनवच्छिन्न है, अर्थात् किसी के अपेक्षा से उसमें महत्व है यह नहीं किन्तु स्वतः है जो आपेक्षिक महत्व विशिष्ट होता है। उसमें किसी की अपेक्षा अल्पत्व भी रहता है जैसे घटपट, आदि के अपेक्षा महत्व पृथ्वी में है, परन्तु आकाश, आदि की अपेक्षा अल्पत्व भी है। अतः ब्रह्म में निरपेक्ष महत्व है जो कि अन्यपद नित्य त्वादि बोधक नित्य आदि पदों से अवगत नित्य शुद्ध-बुद्ध त्वादि को कह रहा है अभिप्राय यह कि ब्रह्म शब्द से निरतिशय बृहत्त्व अर्थात् अनपेक्ष महत्व विशिष्ट अर्थ न प्रतीत हो कर आपेक्षिक महत्व प्रतीत हो तो उसमें घटादि की तरह अनित्यत्वादि दोष के संभव होने पर, मुमुक्षु के जिज्ञासा

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

 CC-0. In Public Domain. Digitization by eGangotri

की योग्यता के अभाव होने के कारण वाक्यार्थ अन्वित नहीं होगा। इसलिए आपेक्षिक महत्व के अतिरिक्त 'ब्रह्म' शब्द से सर्वतः अनवच्छिन्न देश काल वस्तु एतत्त्रिविधपरिच्छेदशून्य रूप अतिशायित्व प्रतीत होता है। किसी देश में विद्यमान रहकर देशान्तर में न रहना देशतः परिच्छेद है। किसी काल में रहते हुए अन्यकाल में न रहना कालतः परिच्छेद है। किसी वस्तु के भेद का प्रतियोगी या अनुपयोगी होना वस्तुतः परिच्छेद है। उक्त तीनों परिच्छेद अनित्य घटादि में ही संभव है न कि विभु (सम्पूर्ण देश में रहने वाले) ब्रह्म में।

इस प्रकार तत्पदार्थ (ब्रह्म) में शुद्धत्वादि की प्रसिद्धि बताकर त्वं पदार्थ को कह रहे हैं—सर्वस्यात्मत्वाच्च·········। सबकी आत्मा होने से भी 'ब्रह्म है' यह प्रसिद्ध है। "ब्रह्म है" इसका ज्ञान सभी को है, यहाँ तक कि धूल से सने हुए पैर वाले, अक्षरशून्य हलवाहे जैसे निम्न प्राणी को भी ब्रह्म के अस्तित्व का ज्ञान है। क्योंकि वह आत्मा है। इसी को स्फुट कर हैं। सर्वो हि—संसार के प्रत्येक प्राणी को आत्मा के अस्तित्व की प्रतीति होती है। "मैं नहीं हूँ" ऐसी प्रतीति नहीं होती। यदि आत्मा के अस्तित्व की प्रसिद्धि होती नहीं तो सभी ऐसी प्रतीति करने लगते कि "मैं नहीं हूं" किन्तु ऐसा नहीं होता, बल्कि 'मैं हूं' यही सबको प्रतीत होता है। "मैं हूँ" ऐसा ज्ञात होने पर भी आत्मा का ज्ञान न हो अतः भाष्य मे सर्वलोको नाहमस्मीति प्रतीयात् कहा। द्वैत प्रपंच के सत्य होने से अद्वैत विषयक अनर्थ निवृत्ति असम्भव है, इसलिए शास्त्रारम्भ नहीं करना चाहिए यह अध्यास भाष भामती के प्रारम्भ में आया है, वहाँ प्रपंच की असत्यता को दिखाकर उसका निराकरण किया गया।

अब 'अद्वैतब्रह्म प्रसिद्ध है या अप्रसिद्ध है?' ये दोनों पक्ष शास्त्र के विषय नहीं हो सकते अतः पुनः विचार-शास्त्र का आरम्भ व्यर्थ है। यह तत्पुनर्ब्रह्म से कह रहे हैं जिससे कि पुनरुक्त दोष नहीं है। अहंकार के अधिष्ठान भूत जीवात्मा की प्रतीति यदि न हो तो 'अहं' प्रतीत भी न होगा। अहं की प्रतीतिसे चित्' (आत्मा) और 'अचित्' (अन्तःकरण) इन दोनों का बोध होता है। इस लिए अहं की प्रतीति में आत्मा भी भासता है। अच्छा अहंकारास्पद सभी उपादानों से आत्मा को प्रतीति हो पर इससे ब्रह्म का बोध तो हो नहीं जायगा। भाष्य में यही कहते हैं कि "आत्मा ही ब्रह्म है"। "तत्त्वमसि" इस वाक्य मे तत्पद से उपस्थित 'सत्' शब्द से व्यवहृत ब्रह्म का परामर्श होता है और उसका त्वं पद के साथ सामानाधिकरण्य है। इस लिए तत्पदार्थ

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri


शुद्ध बुद्धत्वादि की प्रसिद्धिशब्द से तथा त्वं पदार्थ जीवात्मा की प्रसिद्धि प्रत्यक्ष से है। अतः जीव को पदार्थज्ञान पूर्वक वाक्यार्थ ज्ञान होने से ब्रह्मभाव की अवगति "तत्त्वमसि" वाक्य से उपपन्न होती है। "तत्त्वमसि" इस वाक्य में ब्रह्म को आत्मत्त्वेन प्रसिद्धि है। 'ब्रह्म आत्मत्त्वेन प्रसिद्ध है, यह कथन आत्मा और ब्रह्म की अभेद-विवक्षा में है। इस प्रकार आत्मत्त्वेन प्रसिद्ध ब्रह्म ज्ञात ही है और यदि ज्ञात भ: ब्रह्म की ब्रह्म की जिज्ञासा हो तब अजिज्ञास्यतापत्ति दोष होने में सन्देह नहीं। इसका निराकरण कर रहे हैं, न, तद्विशेषं........। सामान्यरूप से ज्ञात होने पर भी विशेषरूप मे सशयास्पद होने पर जिज्ञास्य है। इस प्रकार साधक बाधक प्रमाण के अभाव में वह संशय का कारण कहा गया और संशय होने से जिज्ञासा उत्पन्न होता ही है।

भामती

विवादाधिकरणं धर्मी सर्वतन्त्रसिद्धान्तसिद्धोऽभ्युपेयः। अन्यथाअनाश्रया भिन्नाश्रया वा विप्रतिपत्तयो न स्युः। विरुद्धा हि प्रतिपत्तयो विप्रतिपत्तयः। न चानाश्रया: प्रतिपत्तयो भवन्ति, अनालम्बनत्वापत्तेः। न च भिन्नाश्रया विरुद्धाः। न ह्यनित्या बुद्धिर्नित्य आत्मेति प्रतिपत्तिविप्रतिपत्ती। तस्मात्तत्पदार्थस्य शुद्धत्वादेर्वेदान्तेभ्यः प्रतीतिस्त्वंपदार्थस्य च जीवात्मनो लोकतः सिद्धिः सर्वतन्त्रसिद्धान्तः तदाभासत्वानाभासत्वतत्तद्विशेषेषु परमत्र विप्रतिपत्तयः। तस्मात्सामान्यतः प्रसिद्धे: धर्मिणी विशेषतो विप्रतिपत्तौ युक्तस्तद्विशेषेषु-संशयः।

सुभद्रा—विरुद्ध प्रतिपत्ति (ज्ञान) जिससे हो वह विप्रतिपत्ति है एक धर्मिक विरुद्ध कोटि द्वयावगाहिज्ञानजनकवाक्य "पर्वतोवह्निमान न वा", "स्थाणुर्वा पुरुषो वा" आदि विप्रतिपत्ति है। क्योंकि यहाँ पर पर्वत धर्मिक अर्थात् पर्वत है धर्मीविशेष्य जिस ज्ञान में 'विरुद्ध कोटिद्वय-'वह्निमान्' 'वह्न्यभाववान्' उसको विषय करने वाला "यह पर्वत वह्निवाला है अथवा वह्न्यभावयुक्त है" इत्याकारक संशयजनक विरुद्धज्ञान उसका जनक उक्तवाक्य विप्रतिपत्ति है। वाक्य संशय का साक्षात् जनक नहीं क्योंकि वाक्यजन्य ज्ञान शाब्दबोधात्मक होता है, संशय मानस प्रत्यक्ष रूप है, सिद्धान्त में साक्षिप्रत्यक्ष रूप है। किन्तु विरुद्धज्ञान संशय का जनक है और विरुद्ध ज्ञान का जनक विप्रतिपत्ति वाक्य है और वह विरुद्धज्ञान सिद्धि और बाध के न होने से अर्थात् उस ज्ञान की सिद्धि न तो प्रमाण से ही निश्चित होती है और न तो उसका बाध ही हो रहा है। अतः वह संशय को उत्पन्न करता है। संशय विचार का अग है। प्रकृत में वेदान्त वाक्य श्रवणान्तर आत्मा का सामान्य ज्ञान होने पर देह ही आत्मा है या इन्द्रियादिक ऐसा विरुद्ध कोटिक

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ज्ञान होने से इस विवाद का आश्रय आत्मरूप धर्मी सर्वतन्त्र सिद्धान्त सिद्ध मानना पड़ेगा। नहीं तो आश्रय के न होने या भिन्न आश्रय के होने के विप्रतिप्रत्तियाँ ही नहीं होंगी। इसका यह आशय है कि यदि आत्मरूप धर्मी न अंगीकार किया जाय अथवा उन विवादों का शरीर या इन्द्रियादिक ही आत्मा है ऐसा भिन्न-भिन्न धर्मी मान लिया जाय तो उक्त विप्रतिपत्ति का स्वरूप हीन हो सिद्ध होगा। इसलिए एक धर्मी का मान आवश्यक है।

विरुद्धज्ञान ही विप्रतिपत्ति है तो वह विरुद्ध दो ज्ञान एक के विरोधी तभी होंगे जब दोनों ज्ञान में धर्मी (विशेष्य) एक भासै, अन्यथा नहीं। भिन्न धर्मिक ज्ञानों की बुद्धि जैसे अनित्य है, आत्मा नित्य है विरोध नहीं होता। प्रतिपत्ति (ज्ञान) बिना आश्रय के नहीं होता अन्यथा ज्ञान निराधार होने लगेगा। भिन्न आश्रयक ज्ञान में विरोध नहीं है जिसका उदाहरण पूर्व प्रतिपादित है। इस हेतु से जिससे कि विप्रतिपत्ति एक आश्रय में होती है जिस लिए एक आलम्बन में पहिले ज्ञान के विषय का निषेध कर के विरुद्धज्ञान उत्पन्न होता है अतः प्रति-योगित या विप्रतिपत्ति एकाश्रय होने से तत् पदार्थ और त्वं पदार्थ तथा उनके एकत्व की प्रतीति लोक और शास्त्र से सबको इष्ट है। तत्त्वमसि इस वाक्य घटक तत्पदार्थ के शुद्धत्वनित्यत्वादि की प्रतीति वेदान्त वाक्यों से और त्वं पदार्थ जीवात्मा की प्रतीति लोक प्रमाण से सिद्ध है। यह सर्वतन्त्र सिद्धान्त सिद्ध है ऐसा अंगीकार करना पड़ेगा फिर विवाद किसमें हैं, उसको बतला रहे हैं— तदाभासत्व अनाभासत्व तद्विशेष में विप्रतिपत्तियाँ हैं। वह प्रतीति आभास है या नहीं—जैसे लोकायतिकचार्वाक आदि को "देह आत्मा है" ऐसी प्रतीति होती है, पर आस्तिको को ऐसी प्रतीति नहीं होती किन्तु प्रतीत्याभास होता है। आस्तिकों को देहादिभिन्न आत्मा है यह प्रतीति होती है पर उसमें चार्वाक को आभासत्व है। आस्तिकों को भी तत्पदार्थ ब्रह्म का त्वंपदार्थ जीव के साथ ऐक्यप्रतीति में गौणता ही है और त्वं पदार्थ की प्रतीति का आलम्बन असङ्ग कूटस्थसाक्षी है, इत्यादि में आभास है या नहीं इत्यादि विशेष में वैमत्य होने से विप्रतिपत्ति सिद्ध होती है अतः संशय होता है तो फिर जिज्ञासा का होना आवश्यक ही है।

## शङ्कर-भाष्यम्

देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता जना लोकायतिकाश्च प्रतिपन्नाः। इन्द्रियाण्येव चेतनान्यात्मेत्यपरे। मन इत्यन्ये। विज्ञानमात्रं क्षणिकमित्येके। शून्यमित्यपरे। अस्ति देहादिव्यतिरिक्तः संसारी कर्त्ता भोक्तेत्यपरे। भोक्तैव केवलं न कर्त्तेत्येके। अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri


केचित्। आत्मा स भोक्तुरित्यपरे। एवं बहवो विप्रतिपन्ना युक्तिवाक्यतदाभास-समाश्रयाः सन्तः। तत्राविचार्य यत्किञ्चित्प्रतिपद्यमानो निःश्रेयसात्प्रतिहन्येतानर्थं चेयात्। तस्माद् ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते।

## भामती

तत्र त्वं पदार्थे तावद्विप्रतिपत्तिं दर्शयति देहमात्र इत्यादिना, भोक्तैव केवलं न कर्त्ता इत्यन्तेन। अत्र देहेन्द्रिय मनःक्षणिकविज्ञानचैतन्यपक्षे न तत्पदार्थ-नित्यत्वादयस्त्वंपदार्थेन सम्बध्यन्ते, योग्यताविरहात्। शून्यपक्षेऽपि सर्वोपाख्या-रहितमपदार्थः कथं तत्त्वमोर्गोचरः कर्त्तृभोक्तृस्वभावस्यापि परिणामितया तत्पदार्थनित्यत्वाद्यसंगतिरेव। अकर्त्तृत्वेऽपि भोक्तृत्वपक्षे परिणामितया नित्य-त्वाद्यसंगतिः। अभोक्तृत्वेऽपि नानात्वे नावच्छिन्नत्वाद् अनित्यत्वादप्रसक्तावद्वै-तहानाच्चतत्पदार्थासङ्गतिस्तदवस्थैव। त्वं पदार्थविप्रतिपत्त्या च तत्पदार्थेऽपि विप्रतिपत्तिदर्शिता। वेदाप्रामाण्यवादिनो हि लौकायतिकादयस्तत्पदार्थप्रत्ययं मिथ्येति मन्यन्ते। वेदप्रामाण्यवादिनोऽप्यौपचारिकं तत्पदार्थमविवक्षितं वा मन्यन्त इति। तदेवं त्वं पदार्थविप्रतिपत्तिद्वारा तत्पदार्थे विप्रतिपत्तिं सूचयित्वा साक्षात्तत्पदार्थे विप्रतिपत्तिमाह—अस्ति तद्व्यतिरिक्तः ईश्वरः सर्वज्ञः सर्वशक्ति-रिति केचित्। तदिति जीवात्मानः परामृशति। न केवलं शरीरादिभ्यः, जीवात्मभ्योऽपि व्यतिरिक्तः। स च सर्वस्यैव जगत ईष्टे। ईश्वर्यसिद्ध्यर्थं स्वाभाविकमस्यरूपद्वयमुक्तम्—सर्वज्ञः सर्वशक्तिरिति। तस्यापि जीवात्मभ्योऽपि व्यतिरेकात् न त्वं पदार्थेन सामानाधिकरण्यमिति स्वमतमाह-आत्मा स भोक्तुरित्यपरे। भोक्तुर्जीवात्मनोऽविद्योपाधिकस्य स ईश्वरस्तत्पदार्थ आत्मा, तत ईश्वरादभिन्नो जीवात्मा, परमाकाशादिव घटाकाशादय इत्यर्थः। विप्रति-पत्तीरूपसंहरन् विप्रतिपत्तिबीजमाह...एवं बहव, इति। युक्ति युक्त्याभास वाक्य वाक्याभास—समाश्रयाः सन्त इति योजना। ननु सन्तु विप्रतिपत्तयस्त-न्निमित्तश्च संशयस्तथापि किमर्थं ब्रह्ममीमांसाऽऽरभ्यत इत्यत आह—तत्रावि-चार्येति। तत्त्वज्ञानाच्च निःश्रेयसाधिगमो नातत्त्वज्ञानाद्धधितुमर्हति।

अपि चातत्त्वज्ञानान्नास्तिक्ये सत्यनर्थप्राप्तिरित्यर्थः। सूत्रतात्पर्यमुपसंह-रति— तस्मादिति। वेदान्तमीमांसा तावत्तर्क एव, तदविरोधिनश्च येऽन्येऽपि तर्का अध्वरमीमांसायां न्याये च वेद प्रत्यक्षादिप्रामाण्यपरिशोधनादिषूक्तास्त उपकरणं यस्याः सा तथोक्ता। तस्मात्परमनिःश्रेयससाधनब्रह्मज्ञानप्रयोजना ब्रह्ममीमांसाऽऽरब्धव्येति सिद्धम् ॥१॥

इति जिज्ञासाधिकरणम्।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सुभद्रा—सर्वप्रथम त्वं पदार्थ में विप्रतिपत्ति दिखा रहे हैं—देहमात्रमे साधारण लोग तथा लोकायतिक ( चार्वाक मतानुयायी ) देहमात्र चैतन्यविशिष्ट आत्मा है, ऐसा मानते हैं, किसी के मत में इन्द्रिय ही आत्मा और कुछ लोग मन को ही आत्मा मानते हैं। बौद्ध क्षणिक विज्ञान को ही आत्मा स्वीकार करते हैं तो अपर बौद्ध शून्य ही आत्मा है, यह मानते हैं। तार्किक उक्त देहादि से अतिरिक्त संसारीकर्त्ता भोक्ता ही आत्मा है ऐसा, तथा सांख्यवादी भोक्ता आत्मा है कर्त्ता नहीं, कर्त्री प्रकृति है यह अङ्गीकार करते हैं योग इन सबों से अतिरिक्त ईश्वर सर्वज्ञ सर्वशक्तिमान् है यह मानते हैं। वेदान्तों के मत से भोक्ता जीवात्मा ही उपाधिभेद से ईश्वर है। भामती में इसी को विशद कर रहे हैं—शरीर, इन्द्रिय मन क्षणिक विज्ञान चैतन्य अर्थात् आत्मा है, इस पक्ष में तत्पदार्थ नित्यत्व शुद्धत्वादि का त्वं पदार्थ शरीरादि के साथ योग्यता न होने से सामानाधिकरण्येन सम्बन्ध नहीं हो सकता। अनित्य शरीरादि से नित्य तत्पदार्थ का सम्बन्ध असम्भव है। शून्यवादी के मत में भी सर्वोपाख्या-रहित शून्य जब कोई पदार्थ नहीं है तो वह तत् और त्वं पदार्थ का विषय कैसे हो सकता है ?

'जीवात्मा कर्तृभोक्तृस्वभाववाला है' इस तार्किक-मत में भी उक्त स्वभाव के परिणामी होने से उसका नित्यत्वादिविशिष्ट तत्पदार्थ के साथ सामानाधिकरण्य असंगत ही है क्योंकि वे समवाय सम्बन्धेन आत्मा में ही सुख-दुख मानते हैं। समवाय सिद्ध नहीं होता, जिसका खण्डन अध्यासभाष्य भामती के व्याख्यान सत्ता समवाय निरूपण में किया जा चुका है, अतः अगत्या परिणाम वाद स्वीकृत होने से और सुख-दुःख को आत्मा का परिणाम मानने से आत्मा विनाशी हो जायगा जो तार्किक को अभीष्ट नहीं है।

जीवात्मा ( पुरुष ) अकर्त्ता है किन्तु भोक्ता है इस सांख्यमत में भी भोक्तृत्व क्या सुखदुःखादि का विकार मात्र है अथवा कर्तृत्वादि रहित केवल चिदात्म स्वरूप ही ? पहला पक्ष ठीक नहीं, क्योंकि आत्मा विकारी होने से परिणामी हो जायगा तो फिर नित्यत्वादि तत्पदार्थ की असंगति बनी रहेगी। भोक्ता न मानने पर भी उनके मत में अनेक आत्मा प्रतिशरीर भिन्न-भिन्न स्वीकृत होने से घटपटादि दृश्यवस्तु के समान विनाशी हो जायेंगे जिससे कि एक अद्वितीय शुद्ध नित्य तत्पदार्थ के साथ उसका सम्बन्ध नहीं हो सकता। इस प्रकार त्वं पदार्थ में विप्रतिपत्ति होने से उसके द्वारा तत्पदार्थ ईश्वर में भी विप्रतिपत्ति सूचित होती है। अर्थात् चार्वाकादि अनीश्वर वादियों के मत से ही तत्पदार्थ में विप्रतिपत्ति है, यह प्रदर्शित हुआ। वेद को प्रमाण

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri


न मानने वाले नास्तिक चार्वाक, बोद्धादि तत्पदार्थ की प्रतीति को मिथ्या मानते हैं और वेद को प्रमाण मानने वाले आस्तिक तार्किकादि भी "तत्पदार्थ औपचारिक ( गौणार्थक ) है" अर्थात् तत्पदार्थ विवक्षित नहीं है ऐसा मानते हैं। इस प्रकार त्वं पदार्थ में विप्रतिपत्ति दिखला कर उसके द्वारा तत्पदार्थ में भी विप्रतिपत्ति सूचित होती है इसे बताकर साक्षात् तत्पदार्थ में विप्रतिपत्ति कह रहे हैं। 'अस्ति' इत्यादि से—तत् पदेन जीवात्मा का परामर्श होता है ईश्वर केवल शरीरादि से ही अतिरिक्त नहीं किन्तु जीवात्मा से भी अतिरिक्त ईश्वर सर्वज्ञ सर्वशक्तिमान है यह कुछ लोग मानते हैं। वह सम्पूर्ण जगत का शासन करने में समर्थ है। उसमें ऐश्वर्य सिद्धि के लिए उसके दो रूप सर्वज्ञत्वं और सर्वशक्तिमत्व कहे गये। उसके भी जीवात्मा से भिन्न होने के कारण त्वं पदार्थ के साथ उसका सामानाधिकरण्य नहीं हो पाता इस लिए अपना मत ( वेदान्त मत ) कह रहे हैं आत्मा स भोक्तुरपरे। भोक्ता जीवात्मा जो अविद्योपाधिक अथवा अन्तःकरणोपाधिक है, उसका तत्पदार्थ ईश्वर आत्मा यानी स्वरूप है, अतः ईश्वर से जीवात्मा अभिन्न है यह सिद्ध होता है महाकाश से अभिन्न घटाकाश की तरह। इस तरह विप्रतिपत्तियों का उपसंहार करते हुए विप्रतिपत्तियों के बीज को कह रहे हैं। एवं बहवो विप्रतिपन्नाः इत्यादि—इस प्रकार युक्ति युक्त्याभास और वाक्यवाक्याभास का आश्रय लेकर अनेक विप्रतिपन्न हैं। आत्मा स भोक्तुः" इस वेदान्त सिद्धान्त पक्ष में युक्ति और वाक्य है अन्य पक्षों में युक्त्याभास और वाक्याभास है यह जानना चाहिए। अब जिस में विप्रतिपत्तियाँ हों तथा तन्निमित्तक संशय भी हों ऐसे ब्रह्म विचार के प्रारम्भ से क्या लाभ ? इस पर भाष्य में कह रहे हैं—तत्रावि विचार के बिना कुछ भी मानने पर निःश्रेयस् परमा कल्याण रूप मोक्ष की प्राप्ति नहीं होगी तत्वज्ञान से ही निःश्रेयस् की प्राप्ति होती है अन्यथा नहीं। अतत्त्वज्ञान से अनर्थ की प्राप्ति होती है।

अब यहाँ पर सूत्र के तात्पर्य का उपसंहार करते हैं तस्माद इत्यादि—इसलिए ब्रह्म जिज्ञासा के उपन्यास द्वारा ब्रह्ममीमांसा ( ब्रह्म विचार ) तथा उसके अविरोधी तर्क सहकृत निःश्रेयस यानी मोक्ष प्रयोजन है जिसका, वह प्रस्तुत किया जाता है। भाष्य में तर्क को अलग कहने से वेदान्त मीमांसा तर्क नहीं है ऐसी आशंका न हो। अतः भामती में कहा गया वेदान्त मीमांसा भी तर्क ही है उसके अविरोधी अन्य तर्क यज्ञ मीमांसा अर्थात् पूर्व मीमांसा न्याय, वेद और प्रत्यक्षादि प्रामाण्य के परिशोधनादि में कहे गये हैं, वे हैं पकरण सहायक जि के ऐसा यह भाष्य में स्थित तदविरोधितर्कोपकरण

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शब्द का अर्थ है। इस लिए परम निःश्रेयस् मोक्ष का साधन जो ब्रह्मज्ञान, वह है प्रयोजन जिस मीमांसा का, ऐसी ब्रह्म-मीमांसा आरम्भ करनी चाहिए। यह सिद्ध हुआ।

अर्थापत्ति और अनुमान रूप तर्क यहां अभीष्ट है। वेदान्त मीमांसा वेदान्त विचार, तद्रूप है, उसके अविरोधी श्रुति लिङ्ग, वाक्यप्रकरण स्थान समाख्या, आदि जो वेद के प्रामाण्य के परिशोधक हैं जिनका विचार पूर्व मीमांसा में किया गया है। वेद और प्रत्यक्ष आदि के लक्षण का न्यायशास्त्र में विचार किया गया है। स्मृति आदि धर्मशास्त्रों से वेद के अनुमान में अनुमान के चिन्ता का उपयोग है, धर्मशास्त्र विहित, आचार वेदमूलक होने से ही प्रामाणिक हैं इसलिए उनके वेदमूलकत्व अनुमान में अनुमान के स्वरूप, निर्णय का उपयोग इस वेदान्त मीमांसा में है, न्याय शास्त्र में लक्षण द्वारा प्रमाणप्रमेय आदि का विवेचन और जातिपदार्थ है कि व्यक्ति पदार्थ इसका विवेचन, किया गया है, इसका भी उपयोग, इसमें है। ए सब प्रमाण के अनुग्राहक होने, से तर्क हैं।

## शाङ्कर-भाष्यम्

ब्रह्म जिज्ञासितव्यमित्युक्तम्। किं लक्षणं पुनस्तद् ब्रह्मेत्यत आह भगवान् सूत्रकार :—

## भामती

तदेवं तावत् प्रथमेन सूत्रेण मीमांसारम्भमुपपाद्य ब्रह्ममीमांसामारभते—एतस्य सूत्रस्य पातनिका-'ब्रह्मजिज्ञासितव्यमित्युक्तम् किं लक्षणं पुनस्तद् ब्रह्म'। अत्र यद्यपि ब्रह्मस्वरूपज्ञानस्य प्रधानस्य प्रतिज्ञा तदङ्गान्यपि प्रमाणादीनि प्रतिज्ञातानि, तथापि स्वरूपस्य प्राधान्यात् तदेवाक्षिप्य प्रथमं समर्थ्यते। तत्र यद्यावदनुभूयते तत्सर्वं परिमितम् अविशुद्धमबुद्धं विध्वंसि, न तेनोपलब्धेन तद्विरुद्धस्य नित्यशुद्धबुद्धस्वभावस्य ब्रह्मणःस्वरूपं शक्यं लक्षयितुम्। नहि जातु कश्चित् कृतकत्वेन नित्यं लक्षयति। न च तद्धर्मेण नित्यत्वादिना तल्लक्ष्यते, तस्यानुपलब्धचरत्वात्। प्रसिद्धं हि लक्षणं भवति, नात्यन्ताप्रसिद्धम्। एवं च न शब्दोप्यत्र प्रक्रमते अत्यन्ताप्रसिद्धतया ब्रह्मणोऽपदार्थस्यावाक्यार्थत्वात्। तस्माल्लक्षणाभावाद् न ब्रह्म जिज्ञासितव्यमित्याक्षेपाभिप्रायः। तमिममाक्षेपं भगवान् सूत्रकारः परिहरति—जन्माद्यस्य यतः इति।

सुभद्रा—सर्वप्रथम यह बतलाया गया कि ब्रह्म की जिज्ञासा करनी चाहिए अर्थात् ब्रह्मज्ञान की इच्छा रखने वाले पुरुष को यह शास्त्र सुनना चाहिए तो अब ब्रह्म का लक्षण है बताना आवश्यक समझकर भगवान बादरायण ने इस

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri


द्वितीय सूत्र "जन्माद्यस्य यतः" का प्रणयन किया। इस प्रकार प्रथम सूत्र से ब्रह्म विचार के आरम्भ का उपाख्यान कर अब ब्रह्म मीमांसा आरम्भ करते हैं। इस सूत्र की अवतरणिका भाष्यकार कहते हैं—यद्यपि मुमुक्षु को ब्रह्मज्ञान के लिए वेदान्त वाक्य का बिचार करना चाहिए ऐसी प्रतिज्ञा होने पर ब्रह्म के स्वरूप विचार की तरह अनेक अङ्गभूत प्रमाण युक्ति साधन फल विचार ए सभी प्रतिज्ञात हो गए तो प्रथम ब्रह्म ही का विचार क्यों किया जाय, ऐसी शंका होने पर भामती में कहा यद्यपी त्यादि से यद्यपि ब्रह्मस्वरूप ज्ञान के प्रधान होने के कारण उसकी प्रतिज्ञा होने से अङ्गभूत प्रमाणादि भी प्रतिज्ञाके विषय हैं तथापि स्वरूप के प्रधान होने से अर्थात् अभ्यर्हित श्रेष्ठ होने से पहिले उसी का आक्षेप कर निर्देश कर रहे हैं। लक्षण वहीं होता है जो सजातीय और विजातीय की व्यावृत्ति करें, जैसे गन्धवत्त्व पृथ्वी का लक्षण है, तो वह द्रव्यत्वेन सजातीय जलादि से पृथ्वी को व्यावृत्त (अलग) किमा और विजातीय गुणादि से भी इस लिए वह लक्षण है। तो क्या दृश्यमान यह जगत ही कारणता सम्बन्ध से ब्रह्म में विद्यमान लक्षण है अथवा नित्य शुद्धत्वादिक? ऐसा विकल्प होने होने पर प्रथम लक्षण नहीं बनता, उसको भामती में कह रहे हैं—"तत्र यद्यावदनुभूतयते" इत्यादि—जो कुछ जितना अनुभूत होता है वह सब परिमित है तथा अशुद्ध, जड़ और विनाशी है तो उपलब्धिविषयीभूत इस जगत् से तद्विपरीत नित्य शुद्ध-बुद्ध स्वभाव ब्रह्म का स्वरूप लक्षित नहीं कर सकते क्योंकि कोई भी अनित्य से नित्य का लक्षण नहीं करता, इस लिए जगत् ब्रह्म का लक्षण नहीं है इस प्रकार प्रथम पक्ष सर्वथा असंभव है और न तो ब्रह्म मे रहने वाले नित्यत्वादि धर्म ही उसके लक्षण हैं क्योंकि वे उपलब्ध नहीं हैं। [१]प्रसिद्ध ही लक्षण होता है न कि अत्यन्त अप्रसिद्ध। इस तरह यहाँ पर न शब्द भी प्रक्रान्त हैं, लक्षण के असम्भव होने से और अत्यन्त अप्रसिद्ध होने से ब्रह्म पदार्थ नहीं हैं और पदार्थ ज्ञान पूर्वक वाक्यार्थ ज्ञान होने से वाक्यार्थ भी नहीं है। अतः लक्षण न होने से ब्रह्म जिज्ञास्य नहीं है, ऐस आक्षेप किया गया इसका परिहार सूत्रकार निम्न सूत्र से कर रहे हैं।

---

१—भाष्यमे ब्रह्मजिज्ञासितव्य मित्युक्तम्, यद कहा गया है, तो पूर्वोक्त आक्षेप होने से अर्थात् ब्रह्म का लक्षण नवननेसे ब्रह्म को जिज्ञासा न करनी चाहिए, तो वहां पर न शब्द भी प्राकरणिक है यह भाव है।


Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

# जन्माद्यस्य यतः ॥२॥

अस्य जगतः यतः जन्मादि, इस जगत् की उत्पत्ति स्थिति और प्रलय जिससे हो वह ब्रह्म है यह सूत्र का अर्थ है।

## शाङ्करभाष्यम्

जन्म उत्पत्तिरादिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिः। जन्मस्थितिभङ्गं समासार्थः। जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं च। श्रुतिनिर्देशस्तावत् 'यतो वा इमानि भूतानि जायन्ते, (तैत्ति० ३।१) इत्यस्मिन्वाक्ये जन्मस्थितिप्रलयानां क्रमदर्शनात्। वस्तुवृत्तमपि जन्मना लब्धसत्ताकस्य धर्मिणः स्थिति प्रलयसंभवात्। अस्येति प्रत्यक्षादिसंनिधापितस्य धर्मिण इदमा निर्देशः। षष्ठी जन्मादिधर्मसम्बन्धार्था। यत इति कारण निर्देशः। अस्य जगतो नामरूपाभ्यां व्याकृतस्यानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाऽप्यचिन्त्यरचनारूपस्य जन्मस्थितिभंगम् यतः सर्वज्ञात्सर्वशक्तेः कारणाद्भवति तद्ब्रह्मेति वाक्य शेषः।

## भामती

मा भूदनुभूयमानं जगत् तद्धर्मतया तादात्म्येन वा ब्रह्मणो लक्षणं तदुत्पत्त्या तु भविष्यति, देशान्तरप्राप्तिरिव सवितुर्व्रज्याया इति तात्पर्यार्थः। सूत्रावयवान् विभजते—जन्मोत्पत्तिरादिरस्येति। लाघवाय सूत्रकृता जन्मादीति नपुंसकप्रयोगः कृतस्तदुपपादनाय समाहारमाह—जन्मस्थितिभंगमिति। जन्मनश्च इत्यादिः कारणनिर्देशः इत्यन्तः सन्दर्भो निगदव्याख्यातः। स्यादेतत् प्रधानकालग्रहलोकपालक्रियायदृच्छास्वभावाभावेषूपप्लवमानेषु सत्सु सर्वज्ञं सर्वशक्ति स्वभावं ब्रह्म जगज्जन्मादिकारणमिति कुतः सम्भावनेत्यत आह—अस्य जगत इति। अत्र नामरूपाभ्यां व्याकृतस्येति चेतनभाव कर्तृकत्व सम्भावनया प्रधानाद्यचेतनकर्तृकत्वं निरूपाख्यकर्तृकत्वं च व्यासेधति। यत् खलु नाम्ना रूपेण च व्याक्रियते तच्चेतनकर्तृकं दृष्टं यथा घटादि विवादाध्यासितं च जगन्नामरूपव्याकृतं तस्माच्चेतनकर्तृकं संभाव्यते। चेतनो हि बुद्धावालिख्य नामरूपे घट इति नाम्ना रूपेण च कम्बुग्रीवादिना बाह्यं घटं निष्पादयति। अतएव घटस्य निर्वर्त्यस्याप्यन्तः संकल्पात्मना सिद्धस्य कर्मकारक भावोघटं करोतीति। यथाहुः—बुद्धिसिद्धं तु न तदसत् इति। तथा चाचेतनो बुद्धावनालिखितं करोतीति न शक्यं सम्भावयितुमिति भावः। स्यादेतत्—चेतना ग्रहा लोकपाला वा नामरूपे बुद्धावालिख्य जगज्जनयि-

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ष्यन्ति कृतमुक्तस्वभावेन ब्रह्मणेत्यत आह—अनेककर्तृ भोक्तृसंयुक्तस्येति। केचित् कर्त्तारो भवन्ति, यथा सूदर्त्विगादयो न भोक्तारः। केचित् भोक्तारः यथा श्राद्धवैश्वानरीयेष्ट्यादिषु पितापुत्रादयो न कर्त्तारः तस्मादुभयग्रहणम्। देशकालनिमित्तक्रियाफलानि" इतीतरेतरद्वन्द्वः। देशादीनि च प्रतिनियतानि चेति विग्रहः। तदाश्रयो जगत् तस्य। केचित् खलु प्रतिनियतदेशोत्पादाः यथा कृष्णमृगादयः। केचित् प्रतिनियतकालोत्पादाः यथा कोकिलस्वरादयः केचित् प्रतिनियतनिमित्ताः यथा, नवाम्बुदध्वानादिनिमित्ताः बलाकागर्भादयः, केचित् प्रतिनियतक्रियाः यथा ब्राह्मणानां याजनादयो नेतरेषाम् एवं प्रतिनियतफलाः यथा केचित्सुखिनः केचिद् दुःखिनः एवं य एव सुखिनस्त एव कदाचिद् दुःखिनः। सर्वमेतदाकस्मिकापरनाम्नि यादृच्छिकत्वे च स्वाभाविकत्वे चा सर्वशक्तिकर्तृकत्वे च न घटते, परिमितज्ञानशक्तिभिर्ग्रहज्ञोकपालादिभिर्ज्ञातुं कर्त्तुं चाशक्यत्वात्। तदिदमुक्तम्—मनसाप्यचिन्त्यरचनारूपस्येति। एकस्या अपि हि शरीररचनायाः रूपं मनसा न शक्यं चिन्तयितुं कदाचित्, प्रागेव जगद्रचनायाः, किमङ्ग पुनः कर्त्तुमित्यर्थः सूत्रवाक्यं पूरयति तद् ब्रह्मेति वाक्यशेषः।

सुभद्रा—यह अनुभूयमान जगत् ब्रह्मधर्मतया अथवा तादात्म्येन ब्रह्म का लक्षण भले न हो किन्तु ब्रह्म से उत्पन्न होने के कारण जगत अपने कारण को लक्षित करता ही है इसलिए जगतकारणत्व ब्रह्म का लक्षण हो सकता है। जैसे सूर्य की देशान्तर प्राप्ति उसके गमन को सूचित करती है उसी तरह कार्य जगत अपने कारण को भी सूचित करता है वही कारण ईश्वर या ब्रह्म है। अभिप्राय यह है कि शुद्ध ब्रह्म का लक्षण नहीं बनता या सविशेष ब्रह्म ईश्वर का ? यदि प्रथम पक्ष माने तो निर्गुण ब्रह्म का लक्षण न बनना अभीष्ट ही है और द्वितीय पक्ष के मानने पर ईश्वर का जगतकारणत्व लक्षण संभव होने से कोई दोष नही है।

प्रश्न—सविशेष का यह लक्षण हो, ठीक है परन्तु "अथातो ब्रह्म जिज्ञासा" यहाँ निर्गुण ब्रह्म ही जिज्ञासा का विषय है, नकि सगुण, क्योंकि निर्विशेष शुद्ध ब्रह्म का साक्षात्कार ही सभी अनर्थों की जड़भूत अविद्या की निवृत्ति का कारण है, इसीलिए बृहदारण्यकोपनिषद में 'अस्थूलमनणु' और मांडूक्योपनिषद् में 'नान्तः प्रज्ञं न बहिःप्रज्ञं' इत्यादि वाक्यों से निर्विशेष ब्रह्म ही ज्ञेयत्वेन प्रतिपादित है अतः उसी का लक्षण आकांक्षा का विषय है न कि सविशेष।

उत्तर—शास्त्र में द्विरूप ब्रह्म प्रतीत होता है, एक नाम-रूपविकार आदि

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उपाधियुक्त 'सगुण ब्रह्म' जो ईश्वर है, यः सर्वज्ञः सर्वविद्यस्यज्ञानमयं तपः एको ऽहं बहुस्यां इत्यादि श्रुतियां जिसमें प्रमाण हैं। दूसरा सर्वोपाधिवर्जित निर्गुण ब्रह्म है, "अशब्दमस्पर्श-मरूपमव्ययम्, अस्थूलमनणु यत्रनान्यत्पश्यति नान्य च्छृणोति' इत्यादि श्रुतियों जिसमें प्रमाण है। इसी को भाष्यकार ने भी आगे चलकर "आनन्द मयोऽभ्यासात्" इस सूत्र की अवतरणिका में कहा है—"द्विरूपं हि ब्रह्मावगम्यते नामरूपविकारभेदोपाधिविशिष्टं तद्विपरीतं च सर्वोपाधिवर्जितम्"। इस प्रकार सोपाधिक ब्रह्म के ध्यान, पूजा आदि के अभ्यास का परिपाक होने से अन्तकरण शुद्ध होने पर संसार की तुच्छता, निःसारता देखकर निरुपाधिक ब्रह्म के भी श्रवण-मनन निदिध्यासन की आवृत्ति से साधक उक्त ब्रह्म के साक्षात्कार को प्राप्त होता है। अतः निर्गुण-सगुण इस उभयविध ब्रह्म के जिज्ञास्य होने पर निर्गुण का लक्षण असम्भव होने से औचित्येन सगुणब्रह्म का लक्षण किया गया। भाष्य में सूत्र के अवयवों का विभाग कर रहे हैं, जन्मोत्पत्तिरादिरस्येति इत्यादि। जन्म यानी उत्पत्ति, वह है आदि में जिसके ऐसा, तद्गुणसंविज्ञान बहुव्रीहि है। सूत्रकार ने लाघवात् जन्मादि ऐसा नपुंसक पद का प्रयोग किया है अतः उसकी उपपत्ति के लिए समाहार द्वन्द मानकर "जन्मस्थितिभङ्ग समास का अर्थ है" यह भाष्यकार ने कहा। अन्यथा "जन्म आदिः ययोः स्थितिभङ्गयोः तौ जन्मादी" ऐसी व्याख्या विवक्षित होने पर ईदूदेद्द्विवचनं प्रगृह्यम् इस सूत्र से प्रगृह्य संज्ञा होकर प्रकृति भाव होने से यण् नहीं होगा तो जन्मादी अस्य ऐसा होने लगेगा।

"यतो वा इमानि भूतानि जायन्ते" इस श्रुति में पहले निर्देश होने के कारण जन्म में आदित्व है और वस्तुवृत्त की अपेक्षा भी आदित्व है, क्योंकि कोई वस्तु उत्पत्ति के बाद ही जब सत्ता को प्राप्त होता है तभी स्थिति और प्रलय (विनाश) को भी प्राप्त होता है। सूत्र में अस्य प्रत्यक्षादि प्रमाण से सन्निधान को प्राप्त हुआ धर्मी 'जगत्' का इदम् शब्द से निर्देश है, षष्ठी जन्मादि के साथ सम्बन्धनिर्देश के लिए है, यतः अर्थात् जिससे, यह कारण निर्देश है। इस प्रकार "जिस कारण (परमात्मा) से यह सम्पूर्ण जगत् जन्मस्थिति और प्रलय को प्राप्त होता है वह ब्रह्म है" यह सूत्र का अर्थ निष्पन्न होता है। वह ब्रह्म है, इस तरह जन्मनश्च से लेकर कारण निर्देश इत्यन्त, पयन्त ग्रन्थ स्पष्ट होने से स्वयं व्याख्यात है।

अच्छा तो प्रधान काल ग्रह लोकपाल क्रिया यदृच्छा स्वभाव अभाव आदि कारणों के रहते हुए (ब्रह्म के कारणता का जो निराकरण कर रहे हैं। उन सबों की विद्यमानता में सर्वज्ञ सर्वशक्तिमान् ब्रह्म ही जगत् के जन्मादि

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri


का कारण है यह सम्भावना कैसे ? इस लिए भाष्य में कहा अस्य जगतः इत्यादि आशय यह कि "कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्" इस श्वेताश्वतरोपनिषत् के मंत्र में योनिशब्द से प्रधान का ग्रहण है तो प्रधान ( प्रकृति ) अथवा काल हो जगत का कारण क्यों न हो ? नियति शब्द से क्रिया का ग्रहण और पुरुष शब्द से ग्रह तथा लोकपाल विवक्षित हैं तो ग्रह और लोक पाल ही जगत के कारण क्यों न हों ? "असदेवेदं सोम्य अग्र आसीत्" इस श्रुति में 'असत्' कारण है ऐसा कहा गया, तो असत् ( अभाव ) ही कारण क्यों न हो अर्थात् उक्त सभी जगत् के कारण हो सकते है तो फिर ब्रह्म को ही क्यों कारण माना जाय ? स्वभाववाद में स्वभाव ही नियामक है, यदृच्छा पक्ष में नियामक कोई नहीं है अकस्मात् ही जगत उत्पन्न हुआ तो उक्त सूत्र में 'जगत कारणत्व' जो लक्षण प्रतिपादित है वह कालादि में अतिव्याप्त है, यह पूर्व पक्ष का भाव है ।

भाष्यकार इसका उत्तर दे रहे हैं – नाम रूप से प्रकट भाव को प्राप्त इस संसार में जो चेतन भाव को प्राप्त है तत्कर्तृकत्व को ही सम्भावना है न कि अचेतन कर्तृकत्व की, जिससे जगत में प्रधानादि अचेतन कर्तृकत्व का और शुन्य जो उपाख्या से रहित है तत्कर्तृकत्व का निराकरण हो गया, क्यों कि जो नाम और रूप से प्रकट होता है वह चेतनकर्तृक ही देखा गया है, जैसे —घटादि । विवादाध्यासित जगत नामरूप से प्रकट होता है इस लिए वह चेतन कर्तृक हो है, ऐसी सम्भावना की जाती है । चेतन पुरुष ही नाम और रूप को अपनी बुद्धि में बैठाकर इसो लिए बनाने के योग्य घट भी, घट इस नाम से और कम्बुग्रीवादि रूप से युक्त बाह्य घट को बनाता है । जो कि बाहर अभी सिद्ध नहीं है किन्तु भीतर अन्तःकरण के संकल्परूप से सिद्ध है उसमें कमकारकत्व 'घंट करोति' की सिद्धि होती है, अन्यथा कारक नहीं है, जो क्रिया का कारण हो कार्य के पूर्व में कारण का रहना आवयक है । क्रिया के पूर्व में घट अभी निष्पन्न हो नहीं है तो उसमें कर्मकारकत्व ही कैसे होगा ? बुद्धि में सिद्ध होने से कारकत्व बन जाता है । जैसा कि कहा भी है—'बुद्धिसिद्धं तु न तदसत्'—बुद्धि में सिद्ध होने से 'घट' अविद्यमान नहीं हैं, इत्यादि । तो अचेतन प्रधानादि बिना बुद्धि का विषय हुए ही जगत को करते है यह संभावना नही हो सकती इसलिए उनके कारणत्व का निराकरण हो गया । अच्छा तो अचेतन कारण भले न हो किन्तु चेतन ग्रह लोकपालादि नाम और रूप को बुद्धि में स्थित करके कारण क्यों न हों ? ऐसी आशंका होने पर भाष्यकार ने अनेक कर्तृभोक्तृसंयुक्तस्य कहा— अनेक कर्ता

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri


और अनेक भोक्ता से संयुक्त यह जगत् है। इस अनेक कर्त्ता, भोक्ता जीवों का सृज्यत्वेन अर्थात् ए सब बनाने के योग्य हैं ऐसा निर्देश होने से जगत् बनाने की योग्यता उनमे नही है यह सूचित होता है उसकी व्याख्या भामती में कर रहे हैं। 'केचित कर्त्तारो भवन्ति इत्यादि से। कोई कर्त्ता ही होते हैं, जैसे—सूद, (रसोईदार) जो कि केवल वेतन लेकर भोजन बनाता है, स्वयं भोजन बनाकर करता नही और ऋत्विक् अर्थात् यज्ञ कराने वाले जो कि केवल दक्षिणा के ही भागी हैं नकि यज्ञ जन्य स्वर्गादि फल के वह तो यजमान को प्राप्त होता है। वे केवल कर्त्ता ही है, भोक्ता नहीं। कोई भोक्ता ही है न कि कर्त्ता, जैसे श्राद्ध पुत्र करता है पितरों के उद्देश्य से तो उसका फल स्वर्गादि या तृप्ति पितरों को होती है न कि कर्त्ता पुत्र को। "एवं वैश्वानरं द्वादशकपालं निर्वपेत जाते पुत्रे" ऐसा उपक्रम करके, "यस्मिन् जाते एतामिष्टि निर्वपति पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति" इत्यादि श्रुति से पिता से किया हुआ वैश्वानर इष्टि का फल पवित्रता और तेजस्वी का होना, प्रबलेन्द्रियत्व पशु आदि सम्पत्ति से युक्त होना आदि फल पुत्र में ही है न कि कर्त्ता पिता में तो ए भोक्ता ही हैं न कि कर्त्ता अतः कर्त्ता भोक्ता दोनों का ग्रहण है और जगत् प्रति नियत देशकाल निमित्त क्रिया फलाश्रय है। देशश्च कालश्च निमित्तश्च क्रिया च फलञ्च तानि देशकाल निमित्त क्रिया फलानि यह इतरेतर योग द्वन्द हैं. प्रति नियतानि च तानि देशादीनि यह विग्रह है। जगत् इन सबका आश्रय है। कोइ प्रति नियत अर्थात् निश्चित देश में उत्पन्न होने वाले हैं जैसे—कृष्णसार मृग का एक निश्चित देश हैं, आर्यावर्त न कि कोई पाश्चात्यदेश को किल की कूज बसन्त काल में ही सुनाई पड़ती है, कोई निश्चित निमित्त वाले हैं जैसे—नवीन जलद की ध्वनि को सुनकर बकुले की स्त्री गर्भ धारण करती हैं तो उसके गर्भ धारण में निश्चित नवाम्बुद ध्वनि ही कारण हैं, कोई निश्चित क्रिय है, जैसे—याजन अध्यापन, प्रतिग्रहादि में ब्राह्मणों का ही अधिकार है न कि अन्य वर्णों का तथा इसी प्रकार कोई दुःखी और सुखी है, उसका सुख अथवा दुखरूप फल नियति वशात् यथा काल निश्चित है। जो सुखी हैं वही कदाचित् दुखी भी होता है और दुखी भी कभी सुखी। यह सब आकस्मिक है दूसरा नाम जिसका ऐसी यदृच्छा और स्वभाव वाद में नहीं बनता। श्रीं उदयनाचार्य ने भी न्याय कुसुमाञ्जलि में कहा है 'हेतु भूति निषेधो न स्वानुपाख्याविधिर्न च। स्वभावरचना नैव अवधेर्नियतत्वतः॥ अकस्मात् ही सभी कार्य उत्पन्न होते हैं यह पक्ष ठीक नहीं क्योंकि तब तो कारण की अपेक्षा न होने से कार्य निरन्तर होते रहेंगे। यदि कारण की अपेक्षा न होने से कार्य न हो तो

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri


कभी भी कार्य उत्पन्न न होंगे कार्य कादाचित्क है यह अर्थात् किसी समय में ही होते हैं यह नियम यदृच्छा बाद में नहीं बनता और अपने से भी नहीं हो सकते क्योंकि उत्पत्ति के पहिले स्वयं असत् होने से असमर्थ है तो वह कभी भी कार्य न होंगे यह उक्त दोष है और अनुव्याख्या अर्थात् शून्यपक्ष में भी सर्वदा कार्यापिपत्ति दोष है इसलिए यह जगत आकस्मिक नहीं हो सकता, स्वाभाविक भी नहीं हैं क्योंकि नियत देशकाल स्वभाव वाले वस्तुओं का स्वभाव से उत्पत्ति मानने पर उनकी अवधि न होगी। जो कारण की अपेक्षा न करके स्वभावतः होते हैं वे नित्य हैं जैसे—आत्मा। घटादि कार्य निश्चित अवधि वाले ही देखे गये हैं अतः जगत का कोई सर्वज्ञ सर्व शक्तिमान कारण है जो कि ईश्वर ही हो सकता है यह भाव है और परीमित ज्ञान शक्तिवाले ग्रह या लोक पालादि भी सम्पूर्ण जगत् का ज्ञान और उसको करने में समर्थ नहीं हैं। इसलिए भाष्य में कहा, मनसाप्यचिन्त्य रचना रूपस्येति— एक भी शरीर के रचना का रूप जो कि मन से भी कभी चिन्तन का विषय सम्भाव्य नहीं है तो पहले अर्थात् सृष्टि के पूर्व जगत की रचना रूप कैसे सम्भाव्य है। जब उसके रूप की सम्भावना मन से भी परिमित ज्ञानशक्ति वाले ग्रह लोक पालादि नहीं कर सकते तो उसके निर्माण में कैसे समर्थ हो सकते हैं? यह भाव है। तो "ऐसे जगत की उत्पत्ति स्थिति और विनाश जिस सर्वज्ञ सर्व शक्तिमान से होता है, वह ब्रह्म है" यह उक्त सूत्र का अर्थ है।

### शाङ्कर-भाष्यम्

अन्येषामपि भावविकाराणां त्रिष्वेवान्तर्भाव इति जन्मस्थितिनाशानामिह ग्रहणम्। यास्कपरिपठितानां तु 'जायतेऽस्ति' इत्यादीनां ग्रहणे, तेषां जगतः स्थितिकाले सम्भाव्यमानत्वान्मूलकारणादुत्पत्तिस्थितिनाशा जगतो न गृहीताः स्युरित्याशंक्येत, तन्मा शङ्कीति योत्पत्तिर्ब्रह्मणः, तत्रैवस्थितिः प्रलयश्च त एव गृह्यन्ते। न यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मुक्त्वाऽन्यतः प्रधानादचेतनात, अणुभ्योऽभावात्, संसारिणो वा उत्पत्त्यादि सम्भावयितुं शक्यम्। न च स्वभावतः, विशिष्टदेशकालनिमित्तानामिहोपादानात्। एतदेवानुमानं संसारिव्यतिरिक्तेश्वरास्तित्वादिसाधनं मन्यन्त ईश्वरकारणिनः। नन्विहापि तदेवोपन्यस्तं जन्मादिसूत्रे, न वेदान्तवाक्यकुसुमग्रथनार्थत्वात्सूत्राणाम्। वेदान्तवाक्यानि हि सूत्रैरुदाहृत्य विचार्यन्ते। वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः, नानुमानादि प्रमाणान्तरनिर्वृत्ता। सत्सु तु वेदान्तवाक्येषु जगतः जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्यायानुमानमपि वेदान्तवाक्याविरोधि प्रमाणं भवन्न निवार्यते; श्रुत्यैव च सहायत्वेन तर्कस्या-

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भ्युपेतत्वात्। तथा हि—'श्रोतव्यो मन्तव्यः' (बृह० २।४।५) इति श्रुतिः, 'पण्डितो मेधावी गन्धारानेवोपसंपद्येतैवमेवेह आचार्यवान्पुरुषो वेद' (छान्दो० ६।१४।२) इति च पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति। न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायां किन्तु श्रुत्यादयोऽनुभवादयश्च यथा-सम्भव मिह प्रमाणम् अनुभवावसानत्वाद्भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य।

भामती

स्यादेतत्, कस्मात् पुनर्जन्मस्थितिभङ्गमात्रमिहादिग्रहणेन गृह्यते, न तु वृद्धिपरिणामापक्षया अपीत्यत आह—अन्येषामपि भावविकाराणां वृद्ध्यादीनां त्रिष्वेवान्तर्भाव इति। वृद्धिस्तावदवयवोपचय। तेनाल्पावयवादवयविना द्वितन्तु-कादेरन्य एव महान् पटो जायत इति जन्मैव वृद्धिः। परिणामोऽपि त्रिविधो धर्मलक्षणावस्थालक्षणो उत्पत्तिरेव। धर्मिणो हि हाटकादेर्धर्मलक्षणः परिणामः कटकमुकुटादिस्तस्योत्पत्तिः। एवं कटकादेरपि प्रत्युत्पन्नत्वादिलक्षण परिणाम उत्पत्तिः। एवमवस्थापरिणामो नवपुराणत्वाद्युत्पत्तिः। अपक्षयस्त्ववयवह्रासो नाश एव। तस्माज्जन्मादिषु यथास्वमन्तर्भावाद् वृद्ध्यादयः पृथङ्नोक्ता इत्यर्थः। अथैते वृद्ध्यादयो न जन्मादिष्वन्तर्भवन्ति तथाप्युत्पत्तिस्थितिभङ्गमे-वोपादातव्यम् तथा सति हि तत्प्रतिपादके यतो वा इमानि भूतानीति वेदवाक्ये बुद्धिस्थीकृते जगन्मूलकारणं ब्रह्म लक्षितं भवति, अन्यथा तु जायतेऽस्ति वर्धत इत्यादीनां ग्रहणे तत्प्रतिपादकं नैरुक्तवाक्यं बुद्धौ भवेत्, तच्च न मूलकारण-प्रतिपादनपरम्, महासर्गादूर्ध्वं स्थितिकालेऽपि तद्वाक्योदितानां जन्मादीनां भावविकाराणामुपपत्तेः, इति शंकानिराकरणार्थं वेदोक्तोत्पत्तिस्थितिभङ्ग—ग्रहणमित्याह—यास्कपरिपठितानांत्विति। नन्वेवमप्युत्पत्तिमात्रं सूच्यतां, तन्नान्तरीयकतया तु स्थितिभङ्गं गम्यत इत्यत आह योत्पत्तिर्ब्रह्मणः कारणादिति। त्रिभिरस्योपादानत्वं सूच्यते उत्पत्तिमात्र तु निमित्तकारणसाधारणमिति नोपादानं सूचयेत्। तदिदमुक्त तत्रैवेति। पूर्वोक्तानां कार्यकारण-विशेषणानां प्रयोजनमाह—न यथोक्तेति। तदनेन प्रबन्धेन प्रतिज्ञाविषयस्य ब्रह्मस्वरूपस्य लक्षणद्वारेण सम्भावनोक्ता। तत्र प्रमाणं वक्तव्यम्। यथाहुर्नै-यायिकाः—

सम्भावितः प्रतिज्ञायां पक्षः साध्येतहेतुना।
न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हतः॥

यथा च वन्ध्याजननी इत्यादिरिति।

इत्थं नाम जन्मादि संभावनाहेतुः, यदन्ये वैशेषिकादय इत एवानुमाना-दीश्वरविनिश्चयमिच्छन्तीति सम्भावनाहेतुतां द्रढयितुमाह एतदेवेति चोदयति—

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri 

नन्विहापीति। एतावतैवाधिकरणार्थे समाप्ते वक्ष्यमाणाधिकरणार्थमनुवदन् सुहृद्भावेन परिहरति—न। वेदान्तेति वेदान्तवाक्यकुसुमग्रथनार्थतामेव दर्शयति—वेदान्तेति। विचारस्याध्यवसानं सवासनाविद्याद्वयोच्छेदः। ततो हि ब्रह्मावगतेर्निर्वृत्तिराविर्भावः। तत्किं ब्रह्मणि शब्दादृते न मानान्तरमनुसरणीयम् तथा च कुतो मननं, कुतश्च तदनुभवः साक्षात्कारः? इत्यत आह—सत्सु तु वेदान्तवाक्येष्विति अनुमानं वेदान्ताविरोधि तदुपजीवि चेत्यपि द्रष्टव्यम्। शब्दाविरोधिन्या तदुपजीविन्या च युक्त्या विवेचनं मननं। युक्तिश्चार्थापत्तिरनुमानं वा। स्यादेतत् यथा धर्मे न पुरुषबुद्धिसाहाय्यम्, एवं ब्रह्मण्यपि कस्मान्न भवतीत्यत आह—न धर्मजिज्ञासायामिवेति, श्रुत्यादय इव। श्रुतीतिहासपुराणस्मृतयः प्रमाणम्। अनुभवोऽन्तःकरणवृत्तिभेदो ब्रह्मसाक्षात्कार स्तस्याविद्यानिवृत्तिद्वारेण ब्रह्मस्वरूपाविर्भावः प्रमाणफलम्। तच्च फलमिव फलमिति गमयितव्यम्। यद्यपि धर्मजिज्ञासायामपि सामग्र्यां प्रत्यक्षादीनां व्यापारस्तथापि साक्षान्नास्ति, ब्रह्मजिज्ञासायां तु साक्षादनुभवादीनां संभवोऽनुभवार्था च ब्रह्मजिज्ञासेत्याह—अनुभवावसानत्वात्। ब्रह्मानुभवो ब्रह्मसाक्षात्कारः परमपुरुषार्थः, निमृष्टनिखिलदुःखपरमानन्दरूपत्वादिति। ननु भवतु ब्रह्मानुभवार्था जिज्ञासा, तदनुभव एव त्वशक्यः, ब्रह्मणस्तद्विषयत्वायोग्यत्वादित्यत आह—भूतवस्तुविषयत्वाच्च ब्रह्मविज्ञानस्य।

सुभद्रा—अच्छा तो केवल जन्म स्थिति और नाश हो सूत्रघटक आदि शब्द से क्यों गृहीत हों, क्योंकि भाव पदार्थ में तो ६ विकार होते हैं—उत्पत्ति, सत्ता, वृद्धि, परिणाम अपक्षय और विनाश जैसा कि यास्क मुनि ने कहा है—जायतेऽस्ति वर्धतेविपरिणमते क्षीयतेनश्यति। तो फिर वृद्धि परिणाम और अपक्षय भी क्यों न गृहीत हों? ऐसी आशंका होने पर भाष्यकार समाधान देते हैं कि वृद्धयादिक अन्य विकारों का इन्हीं तीन में अन्तर्भाव हो जाता है, अतः जन्म स्थिति और नाश का ही ग्रहण है।

(१) इसका विवेचन कर रहे हैं भामतीकार वृद्धि—अवयवों के उपचय (बढ़ना) को कहते हैं। इससे थोड़े अवयव से अवयवो द्वितन्तुकादि से (दो सूत या तीन सूत वाले वस्त्र से दूसरा कई सूतवाला महान् वस्त्र उत्पन्न होता है अतः जन्म ही वृद्धि है,

(२) परिणाम भी तीन प्रकार का होता है—धर्मरूप परिणाम, लक्षणरूप परिणाम और अवस्थारूप परिणाम। इनका उत्पत्ति में ही अन्तर्भाव हो जाता है जैसे—धर्मी हाटकादि (सुवर्ण आदि) का धर्मरूप परिणाम है—

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri


